अङ्क-२५
जनवरी-जून २०१५

**वेदविद्या**
ISSN-2230-8962

# पाणिन्यष्टके प्रत्ययपदार्थः

**डॉ. रामसलाहीद्विवेदी**

पदानामपोद्धारक्रमे अवश्यमेव तद्घटकानां कल्पनाविशेषाणां विवेचनङ्कर्तव्यम्। अतस्तद्विवेचने प्रकृतिप्रत्ययश्च इति द्वयमपि अहमहमिकया स्थानमाकलयति। तत्र आगमादेशानामपि पार्थक्येन समायोजनं विधानं वा समाम्नातं धीमताचार्येण तथापि लिङ्गविशेषनिर्देशात् उद्देश्यविशेषस्य सन्निधानात् तयोः प्रकृतिप्रत्ययमध्ययोः समावेशः अवलोक्यते।अतः प्रामुख्येन का नाम प्रकृतिः? कश्च प्रत्ययः? इत्यनुसन्धेयतामर्हति। यद्यपि सर्वत्र दर्शने प्रकृतेः स्वरूपं मातृस्थानापन्नं निर्धारितम्। अत एव महदादीनां विशेषतः प्रकृतित्वमवधारितम्। क्वचिच्च नैसर्गिकेऽप्यर्थे प्रकृतिशब्दः उपयुज्यते यथा “प्रकृत्या चारुः प्रकृतिशः” इत्यादि तथैव शब्दानामपि अपोद्धारकल्पनायाः काचित् प्रथमावस्था प्रकृतिपदेन निगद्यते। अत एव अस्याः वर्णपदेनापि अभिधानम्भवति। यथा स्फोटानामष्टसु[१] विभागेषु मध्ये वर्णस्फोटः व्यक्तिरूपो जातिरूपो वा स सर्वथा अखण्ड एव। यद्यपि तत्र वर्णस्फोटेन प्रत्ययस्फोटोऽपि गृहीतः तथापि प्रकृतेरप्युपादानम्भवत्येव। मीमांसकानान्तु काचिद्भिन्नैव सरणिः वर्णस्फोटेन वर्णध्वनिस्फोटः प्रतिपादितश्चैतत् उपवर्षाचार्येण परन्तु वर्णस्फोटस्य तथाभूतं स्वरूपं महतावधानेन मञ्जूषा-भूषणसार-वाक्यपदीयादिग्रन्थेषु आहत्य आस्ते। इह तु अनुपयोगात् विस्तरभयाच्च नोपगुम्फते। अतः अत्र प्रकृतिशब्दोऽपि पारिभाषिकः,यस्य शब्दस्य धातुपाठकोशादौ साक्षात् परम्परया वा अर्थविशेषः समयीकृतः तस्यैव शब्दस्य प्रकृतित्व[२]मिति।

मतस्यास्योपबृह्मणन्तु प्रत्ययलक्षणनिरूपणावसरे विशिष्य करिष्यते। पुनश्च, उद्देश्यविशेषेण अभिलषणात् प्रकृतार्थे ईप्सितत्वाच्च प्रत्ययपदार्थस्य नैकदर्शनानुरोधेन तत्त्वं विमृश्य वैयाकरणेष्वपि नैकानि मतानि समीक्ष्य किमपि सिद्धान्तभूतं तत्त्वमीहे। प्रमाणन्तु तत्र सुधिय एव।

---

[१] वर्णव्यक्तिस्फोटः,वर्णजातिस्फोटः,सखण्डपदव्यक्तिस्फोटः,अखण्डपदव्यक्तिस्फोटः,पदजातिस्फोटः,सखण्ड वाक्यव्यक्तिस्फोटः,अखण्डवाक्यव्यक्तिस्फोटः,वाक्यजातिस्फोटश्च
प्रौढमनोरमासंस्कृतबालप्रकाशिकाटीकापृष्ठसङ्ख्या-१७

[२] प्रकृतित्त्वमित्थम्परिभाषितम्,शब्दशक्तिप्रकाशिकाकृता-
स्वेतरानवच्छिन्नयत्स्वार्थस्यावबोधने ।
यच्छब्दनिश्चयो हेतुः प्रकृतिः सा तदर्थिका॥
स्वोपस्थाप्ययदर्थस्य बोधने यस्य निश्चयः।
तत्त्वेन हेतुरथवा प्रकृतिः सा तदर्थिका ॥
शब्दशक्तिप्रकाशिकाकारिकासङ्ख्या-७-८

प्रतिपूर्वदिण् धातोः अचि प्रत्यये सामान्यतः प्रत्ययशब्दस्य सिद्धिः। "**वार्णादाङ्गं बलीयो भवति**"[३] इति परिभाषया धातूपसर्गयोः कार्यस्यान्तरङ्गत्वेऽपि गुणकार्यस्य आङ्गत्वात् प्रथमं विधानं पश्चात् अयादेशः। तदनन्तरमेव यणादेशः पूर्वं धातुस्साधनेन युज्यते पश्चादुपसर्गेण इत्येव सिद्धान्तः राद्धान्तीकृतः सुधियस्तल्लजेन भट्टनागेशेन परन्तु अच्प्रत्ययस्य कर्तरि विधानात् यः प्रत्येति स प्रत्ययः इति व्युत्पत्तिलभ्योऽर्थः जायते। तेन प्रत्ययशब्दस्य ज्ञानम्,बुद्धिः, विषयः इत्याद्यर्थाः न सम्भवन्ति। अतः दर्शनान्तरानुरोधेन व्याकरणशास्त्रीयव्यवहारानुरोधेन च किञ्चिदपि अन्यदेव विवरणं उपपादनीयमिति। अतः प्रत्तिपूर्वकात् इण् धातोः बाहुलकात् अच् , घञ् वा इत्यनुसन्धेयः वस्तुतस्तु "**पुंसि सञ्ज्ञायां घः प्रायेण**"[४] इत्येवोपादेयः। अतः प्रतीयते इति प्रत्ययः इति व्युत्पत्तिः प्रसिद्धार्थानुरोधेन कर्तुं युज्यते। तेन बुद्धिः, बुद्धेः परिणामविशेषः सपथः इत्याद्यर्थाः अवगन्तव्याः। यद्वा उपसर्गाणां द्योतकत्वं प्रत्येति इति व्युत्पत्त्या च पारिवस्यरूपार्थस्य प्राधान्यात् अधीनः इत्यर्थः व्यवहारादिषु अवगम्यते। अस्य भावेऽपि विधानमवगन्तव्यम्। तेन **विश्वासः** , **निश्चयः, आचारः, ख्यातिरित्यादिरूपार्थाः**[५] सङ्गताः भवन्तीति।

प्रतीयतेऽनेन इति करणव्युत्पत्त्या तु हेतुः,सहकारिकारणम्, , प्रत्यायति इति व्युत्त्पत्त्या तु सार्थकः इत्यादिभिन्नाः अर्थाः अनुसन्धेयाः भवन्ति। शब्दस्य वैचित्र्यवशात् एतत्सर्वं वक्तुं सहतेऽपि।

परन्तु प्रकृतप्रसङ्गः व्याकरणशास्त्रस्य , तदनुरोधेन प्रसङ्गस्य प्राबल्यं मत्त्वा "शब्दस्यानवच्छेदे विशेषस्मृतिहेतवः"इति नियमानुरोधेन प्रत्ययपदार्थः वैयकरणाभिमततया ईदृश अवधार्यते। तत्र "कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रययः" इतिनियमविज्ञानात् "यथोत्तरं मुनीनां प्रामाण्यमिति सम्प्रदायानुरोधाच्च। भगवन्तं फणीन्द्रं सरणीकृत्य किञ्चिद् विमर्शोद्भावनं यथामति नैकाचार्यप्रज्ञा-विशेषावलोके क्रियते।

तत्र भगवता पतञ्जलिना "**सञ्ज्ञाधिकारोऽयमिति**[६] कृत्वा अस्य तात्पर्यावधारणे महती भूमिका निर्धारिता। यद्यपि सिद्धान्तकौमुदीकृता अधिकारोऽयमित्येवावोचि तथापि तस्य विवरणोपन्यासकाले सञ्ज्ञाधिकार इत्यर्थः प्रतिपादितः। सञ्ज्ञात्वावगमस्तु व्याख्यानात्। व्याख्यानन्तु महाभाष्य-स्यैवापराभिधानम्। अत एव **व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणमिति**"[७] परिभाषयां

---

[३] परिभाषेन्दुशेखरः(वैद्यनाथगदाटीकासंवलितः),परिभाषासङ्ख्या-५५

[४] अष्टाध्यायीसूत्रसङ्ख्या-३/३/११८

[५] न्यायकोशः,पृष्ठसङ्ख्या-५४३

[६] व्याकरणमहाभाष्यम्-३/१/१

[७] परिभाषेन्दुशेखरः(वैद्यनाथगदाटीकासंवलितः),परिभाषासङ्ख्या-१

परिभाषेन्दुशेखरे व्याख्यानपदस्य शिष्टकृतं व्याख्यानमित्येवावधारितम्। शिष्टश्चात्र पतञ्जलिरेव सम्प्रदायानुरोधात्। श्रीमदा रामाज्ञापाण्डेयमहोदयेन "व्याकरणदर्शनभूमिका" इत्याख्ये ग्रन्थे बहुधा विवेचितम्मिह तु तत्सङ्क्षेपतः निबध्यते।

प्रत्ययपदार्थस्य सिद्धान्तभूतः अर्थः स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकत्वमिति रूपेणावगन्तव्यः, भाष्येऽपि स्वीयमर्थं प्रत्याययन्ति इति विग्रहः प्रदर्शितः। अतः भाष्यप्रामाण्यात् तदर्थान्तरभावेन प्रत्ययपदस्य सङ्केतग्रहः कर्तव्यः। स्वीयमित्यस्य "स्वस्य इदमिति व्याख्यानमवगन्तव्यम्। अत्र **"त्यदादीनि च"** [८]इति वृद्धसञ्ज्ञा ,"**वृद्धाच्छः**"[९] इत्यनेन छप्रत्ययः। अतः स्वसम्बन्धिनः अर्थस्य प्रत्यायनात् प्रत्ययशब्दस्य महतीसञ्ज्ञाऽपि सार्थक्यमुपैति। सम्बन्धश्च उभयथा अवगन्तव्यः। तेन स्वस्य स्वप्रकृतेः वा सङ्ग्रहः कर्तव्यः अनेन ये खलु प्रत्ययाः ,येषां साक्षादर्थनिर्दिष्टः नास्ति ते स्वार्थिकाः भवन्ति। तदेवोक्तम् "**अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति**"[१०]

पुनश्च साक्षादर्थविशेषे निर्दिष्टार्थाः प्रत्ययाः स्वीयमर्थमुपस्थापयन्ति किञ्च अर्थविशेषनिर्देशाभावेऽपि सम्बद्धस्य प्रकृत्यर्थस्योपस्थानादपि स्वीयं प्रत्याययन्ति इति व्युत्पत्तेः सङ्घटनात् प्रत्ययानां तादृशव्युत्पत्तिलभ्येऽर्थे सङ्केतावधारणे नास्ति कश्चित् विप्रतिपत्तिलेशः। अतः प्रकृतित्वमपि **प्रत्ययविधावुद्देश्यतावच्छेदकाकान्तत्वमितिरूपेण**[११] निर्धारितम्भवति। प्रकृतिप्रत्यययोः साधुत्वावधारणे काचित् महती भूमिका अवगन्तव्या। तेन **न केवला प्रकृतिः प्रयोक्तव्या न वा केवलः प्रत्ययः**" इत्येषा व्यवहाराभ्यनुज्ञा प्रत्ययः परो भवत्येव इति नियमादुपलभ्यते। तेन प्रत्ययशब्दस्य यथाव्याकरणं स्वीयमर्थं प्रत्यायति इत्येव विवरणमवगन्तव्यम्। स्वीयत्वञ्च पूर्वोपपादितम्, प्रकृतिलक्षणमपि प्रतिपादितम्। इदानीम्प्रकृत्यर्थत्वम्परिभाष्यते श्रीमता भट्टनागेशेन "**स्वप्रकृत्यर्थश्च धातुपाठकोशादौ तमुच्चार्य-बोधितत्वम्**"[१२]। एतेन नभवधाद्यादेशानां प्रत्ययसञ्ज्ञा न प्राप्नोति यतः एतद्व्युत्पत्त्यभावे प्रत्ययाधिकारपठितत्वम् इत्येवल्लक्षणाङ्गीकारे प्रत्ययाधिकारस्य च पञ्चमाध्यायपरिसमाप्ति-पर्यन्तवर्तमानात् तन्मध्य एव "**नाभि नभं च**"[१३] **"हनो वा यद्वधश्च"**[१४] **विराग विरङ्ग च**"[१५] इत्यादयः

---

[८] अष्टाध्यायीसूत्रसङ्ख्या-१/१/७४

[९] अष्टाध्यायीसूत्रसङ्ख्या-४/२/११४

[१०] परिभाषेन्दुशेखरः,परिभाषासङ्ख्या-१२१

[११] लघुशब्देन्दुशेखरः,परश्च इति सूत्रे,पृष्ठसङ्ख्या-१७१

[१२] लघुशब्देन्दुशेखरः,प्रत्ययः इति सूत्रे,पृष्ठसङ्ख्या-१७०

[१३] गणसूत्रम्-५/१/२

[१४] सिद्धान्तकौमुद्याः"ईद्यति" इति सूत्रस्थं वार्तिकम्,वार्तिकसङ्ख्या-१९२३

[१५] गणसूत्रम्-५/१/६४

नैके आदेशाः समापतन्ति। केवलमधिकारविधानात् अतिव्याप्तिराशङ्किता। ताञ्चातिव्याप्तिं महासञ्ज्ञाबलादन्वर्थविज्ञानात् वारिता च आचार्येण। अत एव नभवधाद्यादेशानां साक्षात् कोशाद्वा तदर्थाकथनात् प्रकृत्यर्थत्वं नाङ्गीक्रियते। अतः स्थान्यादेशविधानसमर्थस्यैवादेशता इति न्यायेनैव तेषामर्थवत्त्वं तेषां स्वकीयं किमपि नास्ति। तस्मात् मध्यमगामिनोऽपि ते प्रत्ययसञ्ज्ञकाः न भवन्ति। इदमप्यवगन्तव्यं **"प्रकृतिप्रत्यययोः सहार्थं ब्रूतः तयोः प्रत्ययार्थस्यैव प्राधान्यमिति"**[१६] न्यायेनापि प्रत्ययाः प्रकृत्यर्थम्गर्भीकृत्य स्वीयमर्थमिति व्युत्पत्तिं भजन्ते। तेन तद्विपरीताः प्रत्ययसञ्ज्ञकाः न भवन्ति। अयमेव सारांशः, अयमेव राद्धान्तः। इदमेव प्रत्ययपदप्रवृत्तिनिमित्तम्।

अन्ये तु प्रत्ययविषये केचन इदं विप्रवदन्ते यत्प्रत्ययाधिकारे ये विधीयमानाः ते प्रत्ययाः भवन्ति। तेषामयमाशयः यत् प्रत्ययः इति प्रथमान्तस्य समानाधिकरण्यानुरोधेन आदेशैः सममेवान्वयः भवितुमर्हति। यथा **"गुप्तृज्कृञ्भ्यः सन्"**[१७] इत्यत्र सन् इत्यनेनैव प्रत्ययस्यान्वयः अभिमतः। गुप्तृकृञ्भ्यः सन् भवति स च प्रत्ययसञ्ज्ञको भवति। इत्यादिवाक्यार्थावगमात् तेषां कथनं सङ्गच्छत इव। **"हनस्त च"**[१८] ,**"तृपुजतनो षुक्**[१९]" इत्यादौ च सुपि उपपदे हनो नकारस्य तकारादेशः क्यपि च भवति। एवञ्च षुकोऽपि विधीयमानत्वं स्पष्टमेव । अतः विधीयमानत्वात् तत्रापि प्रत्ययत्वमतिव्याप्तिमुपैति। न च परत्वेन विधीयमानत्वं प्रत्ययत्वमिति लक्षणङ्कर्तव्यं तेन न दोषः तथा सति मिल्लक्षणस्य श्नमः पुरस्तादिति बोधितस्य बहुचः परत्वेन विधीयमानत्वाभावात् प्रत्ययसञ्ज्ञा न प्राप्नोति,भवितव्या तु प्रत्ययसञ्ज्ञया तेन श्नमित्यत्र **"लशकतद्धिते"**[२०] इत्यनेन शकारस्य इत्सञ्ज्ञा बहुचस्तु उपोत्तमस्वरसिद्धिः। अतः परत्वेन विधीयमानत्वं प्रत्ययत्वम् इति लक्षणमपि असम्भवि। अत एव परश्च इति सूत्रस्य प्रत्ययपरो भवत्येव इति रूपेण ज्ञापनं विधाय न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः इत्येतन्नियमस्य ज्ञापनमेव परश्च इत्यधिकारस्य फलमुपात्तम्। अत एव भगवता भाष्यकृता "लविषीय" इत्यत्र प्रत्ययसञ्ज्ञा सन्नियोगेन इटो विधीयमानमाद्युदात्तत्वं स् सीयुड एव स्यात्। अतः आगमानामनुदात्त्वं वक्तव्यमिति।

आद्युदात्तश्च इति सूत्रे उक्तं तथैव कैयटादिभिर्व्याख्यातम्। अतः तद्विरुध्येत अस्याः अयम्भावः **"लूञ् छेदने"**[२१] इत्यस्माद्धातोः लिङि विशेषविहितत्वात् परत्वाच्च पूर्वं सीयुडागमे कृते पश्चात् लादेशे

---

[१६] न्यायकौस्तुभः,पृष्ठसङ्ख्या-६०५

[१७] अष्टाध्यायीसूत्रसङ्ख्या-३/१/५

[१८] अष्टाध्यायीसूत्रसङ्ख्या-३/१/१०८

[१९] अष्टाध्यायीसूत्रसङ्ख्या-४/३/१३८

[२०] अष्टाध्यायीसूत्रसङ्ख्या-१/३/८

[२१] क्र्यादिगणीयः धातुरयम्,सिद्धान्तकौमुदीधातुसङ्ख्या-१४८३

जाते पुनश्च सीयुटः आर्धधातुकत्वात् इडागमे गुणेऽवादेशे ईड अतादेशे षत्वे "लविषीय" इतिरूपं सिद्ध्यति। आद्युदात्तश्च इति सूत्रं धातोः विहितस्य प्रत्ययस्याद्युदात्त्वं शास्ति। अतः प्रत्ययसञ्ज्ञासंयोगेन विधीयमानम् आद्युदात्त्वञ्च सीयुटः स्यात् यतो हि "आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्ता" सर्वेषामभिमता। अन्यथा भूयादित्यादौ तिपः वलाद्यार्थधातुकत्वात् इडागमः दुर्वारः स्यात्। उक्तन्यायाङ्गीकारे न दोषः यासुड्विशिष्टस्य वलादित्वाभावात्। तथैवात्रापि लकारस्य स्थाने इडादेशे तस्य परत्वेन विधीयमानत्वाभावात् परश्च इति संयोगेन विधीयमानायाः प्रत्ययसञ्ज्ञायाः अत्र असम्भवतया प्रत्ययसन्नियोगेन विधीयमानमाद्युदातत्त्वं सीयुटः स्यादिति भाष्योक्तिः विरुद्ध्येत। तस्मात् प्रत्याधिकारपठितत्वे सति परत्वेन विधीयमानत्वं प्रत्ययत्वमिति लक्षणं न युक्तियुक्तम्। तस्मात् प्रत्यायति स्वीयमर्थमित्येव प्रत्ययत्वम्। तेन तकारस्य षुकश्च प्रत्यायनाभावात् न प्रत्ययत्वम् इत्येव स्वीकर्तव्यम्। यत्त्वत्र व्याकरणसिद्धान्तसुधानिधिकृतोक्तम्- प्रयोजनाभावान्न तेषां सञ्ज्ञा ,प्रत्ययसञ्ज्ञायाः मुख्यं फलं परत्वेन विधिः, धातोः विहितत्वे तु सर्वधातुकार्धधातुकान्यतरविधानमिति। आद्युदात्तश्च इतिप्रसङ्गे उदात्तत्वमनुबन्धानुरोधेन तत्तत्स्वरादिकं फलम्। षष्ठीनिर्देशात् तस्याश्च स्थान्यर्थबोधकत्वात् स्थानसम्बन्धानुयोगिनः विधीयमानत्वेन परत्वेन फलं नास्तीति स्पष्टम्। आगमानां अनुदात्तस्वरविधानात् उदात्तस्वरोऽपि न फलम्, निरच्कानां विकाराणां स्वरस्तु भवत्येव न किञ्च स्थानित्वप्रयुक्तस्वरेणैव तत्र निर्वाहः तस्मात् फलाभावात्, तेषां प्रत्याधिकारविधानेऽपि प्रत्ययत्वं सिद्ध्यति[२२] एतदपि न युक्तियुक्तम्। कथमिति चेत् अस्माभिः पूर्वमेवोक्तम् येन प्रत्यायनङ्क्रियते तस्यैव प्रत्ययत्वम्। अत्र तु न च तकारादेशेन न चागमेन कस्यचिदपि अर्थविशिष्टस्य विशेषेण बोधाभावात् महासञ्ज्ञानुरोधेन प्रत्ययसञ्ज्ञा न सम्भवति। किञ्च भवदुक्तरीत्या समाधाने सीयुटः लविषीय प्राप्ताद्युदात्त्वस्य अनुदातत्त्वविधानार्थं "आगमाश्चानुदात्ताः" इति वक्तव्यमिति कथनं विरुद्ध्येत। यतः सिद्धान्ततः तस्य उदात्तात्वाभावे उदात्तरूपफलमप्रसिद्धम्। तद्बाधनार्थं किमर्थं प्रयासः। अतः उदात्तत्वरूपस्वरप्राप्त्या तस्य साफल्यं सम्भवति ,तेन मदुक्तसमाधानेनैव वारणं सम्भवति। त्वदुक्तरीत्या तु न युज्यते।

स्वयञ्च तैरयं सिद्धान्तः अङ्गीकृतः प्रत्याययति इति कर्तृसाधनः कर्मसाधनो वा इति प्रसङ्गद्वयमुपादाय तत्र तत्र अतिव्याप्तिमव्याप्तिं वा प्रदर्श्य समाधानम् उक्तम्। एक एव शब्दः अनेकशक्तियोगात् प्रवृत्तिनिमित्तद्वयावच्छिन्नोऽधिक्रियते इति यथासम्भवमुभयत्र सञ्ज्ञाप्रवृत्तिः। अतः अनेनैव समाधानेनैव भवितव्यमिति। अत्र प्रसङ्गतः नैयायिकानां दृशाऽपि प्रत्ययपदस्य सङ्केतावधारणमवधार्यते। नैयायिकैरुक्तम् -

**यादृशार्थप्रकृत्यन्यो निपातान्यश्च वृत्तिमान्।**

---

[२२] व्याकरणसिद्धान्तसुधानिधिः,"प्रत्ययः" इति सूत्रस्य विवरणे,पृष्ठसङ्ख्या-४८३

**स तादृशार्थे शब्दः स्यात् प्रत्ययोऽसौ चतुर्विधः॥**[२३]

अयमाशयः प्रकृतिभिन्ननिपातान्यश्च यादृशः अर्थः वर्तते तादृशार्थे यः शब्दः तात्पर्यमवधारयति स शब्दः प्रत्ययपदवाच्यो भवति। सोऽपि प्रत्ययः चतुर्विधः। अतः वृत्तिश्च शक्तिनिरूढालक्षणा इतिरूपेण अवगन्तव्या। यतः वृत्तिमानित्यत्र मतुपः विधानं वर्तते। तेन उभयथा वृत्तिग्रहणे न कश्चित् कष्टलेशः। अत्र लक्षणे यादृशार्थे प्रकृतिभिन्नत्वमित्यादिविशेषणन्तु शुक्लशब्दे स्थाशब्दे च व्यभिचारवारणाय इति। यतः "गुणे शुक्लादयः पुंसि ....." इतिनिर्देशात् शुक्लशब्दः गुणवाचकः तथा च शुक्लः पटः इत्यादौ न्यायमतानुसारं शुक्लशब्दः शुक्लवति लाक्षणिको भवति। वैयाकरणानां मतानुसारं तु मतुप्प्रत्ययमुपपाद्य **"गुणवचनेभ्यो मतुपो लुगिष्टः"**[२४] इति पातञ्जलानुशासनेन तस्य वृत्तिमत्त्वैव जायते तद्धितादावपि एकार्थीभावस्याङ्गीकारात् न्यायमते तु न तथा अतस्तस्य समानाधिकरण्यानुरोधात् शुक्लाभिन्नो पटः इतिबोधस्य सर्वानुभवसिद्धत्वात् शुक्लशब्दः शुक्लवति इत्यर्थे लक्षणया उक्तार्थाभिधाने समर्थो भवति। तथा च निपाता अपि प्रकृत्यभिन्नार्थस्य अभिधानं कुर्वन्ति। अतः प्रकृत्यन्यः यादृशः निपातार्थः तत्रातिव्याप्तिवारणाय निपातान्यः इति विशेषणमुपात्तम्।

यद्यपि चादीनामपि प्रकृतित्वमस्ति तेषामपि प्रत्ययप्रत्ययान्तधातुभिन्नत्वात् अर्थवत्वाच्च प्रातिपदिकत्वे सुबुत्पत्तिर्भवत्येव। अव्यत्वात् तेषां सुपां लुम्भवति इति अन्यदेतत्। अत एव तेषां स्वातन्त्र्येणापि प्रयोगः अवलोक्यते। उपसर्गाणान्तु अस्वातन्त्र्येऽपि प्रकृतित्वम् अपरिहार्थम्। अत एव **"आतोऽनुपसर्गे कः"**[२५] इत्यादौ उपसर्गभिन्ने पूर्वपदे ,**"आतश्चोपसर्गे कः"**[२६] इत्यत्र उपसर्गे पूर्वपदे इत्यादिविवरणं स्पष्टमुपलभ्यते। तथापि उपसर्गनिपातानां स्वातन्त्र्येण प्रयोगाभावमभिलक्ष्य **"ब्राह्मणवसिष्ठन्यायेन"**[२७] वा तेषां पृथगुक्तिः साधिता। तदेवोक्तम् स्वरादयस्तु स्वपरतायां प्रकृतयो न तु एकत्वादौ अर्थात् केवलमसत्वभूतमर्थमभिदधते स्वरादयः न तु द्रव्यवदर्थमुपस्थापयन्ति।

यद्यपि यादृशार्थे वृत्तौ इति कथने "पशुना रुद्रं यजते" इत्यत्र " **यजेः कर्मणः करणसञ्ज्ञा सम्प्रदानस्य च कर्मसञ्ज्ञा**[२८]" इत्यत्रापि यादृशार्थे वृत्तिः प्रसिद्धा तादृशार्थे विधानं नोपलभ्यते। अतः निरूढालक्षणा अवगन्तव्या इति तु वक्तुं न शक्यते यतः स्थलविशेषानुरोधेन अनुशासनेन शक्तेः

---

[२३] शब्दशक्तिप्रकाशिका कारिकासङ्ख्या-०९

[२४] "तसौ मत्वर्थे" इति सूत्रस्थं वार्तिकम्

[२५] अष्टाध्यायीसूत्रसङ्ख्या-३/२/३

[२६] अष्टाध्यायीसूत्रसङ्ख्या-३/३/१०६

[२७] "वैदिकानां लौकिकत्वेऽपि प्राधान्यख्यापनार्थं पृथग्ग्रहणम्,यथा-ब्राह्मणा आगताः,वसिष्ठोऽप्यागत इति"पदमञ्जरी,का०भ०,पृष्ठसङ्ख्या-१५

[२८] सिद्धान्तकौमुद्याः"चतुर्थी सम्प्रदाने" इति सूत्रस्थं वार्तिकम्,वार्तिकसङ्ख्या-१०८६

निर्धारणमेव कृतम्। अतः सामान्यतः तृतीयार्थः न ग्राह्यः। अत्र तु तादृश एव अर्थ अवगन्तव्यः। पुनश्च स्वार्थिकप्रत्ययानां स्वरूपमर्थः तेन प्रकृत्यन्यः इति विशेषणेऽपि न क्षतिः। एवमेव प्रकारेण न्यायसिद्धान्तानुसारं भावार्थकप्रत्ययानामनुवादार्थकत्वात् न क्षतिः तेषामपि स्वरूपबोधकत्वेन अवस्थानात् भावो धात्वर्थः। इदन्तु अवगन्तव्यमेव अन्यथा "पाकं पश्य" इत्यत्र धात्वर्थस्य सुबर्थेन सह अन्वयः स्यात्। सिद्धान्तस्तु नायम् ,अमूर्तत्वेन उपस्थानात् तस्य तत्र अन्वययोग्यताविरहात् धातोरप्रातिपदिकत्वेन अप्रकृतित्वाच्च प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामित्यस्य नयस्य सर्वेषामङ्गीकारात्। अतः "**यादृशार्थप्रकृतिनिपातभिन्नत्वे सति यः शब्दो यादृशार्थे उक्तान्यतरवृत्तिमान् स तादृशार्थकप्रत्ययः**"[२९]।

अस्मिन् लक्षणे घटकतया यादृशार्थकप्रकृतिनिपातादिभिन्नत्वमिति समायोजितम्। तच्च अभावज्ञाने प्रतियोगीज्ञानस्य कारणत्वात् बहुविधज्ञानगर्भितत्वाच्च गौरवास्पदमिति मत्वा शब्दशक्तिप्रकाशिकाकारः किञ्चिद् विशिष्टं लक्षणमवधारयति –

**"इतरार्थानवच्छिन्ने स्वार्थे यो बोधनाक्षमः।**
**तिङर्थस्तु निभाद्यन्यः स वा प्रत्यय उच्यते"** ॥[३०]

तेषामयमभिप्रायः यत् नीकाशनिभाद्यन्यत्वे सति यः शब्दः शब्दान्तराविशेषितया यादृशस्वार्थविशेष्यकतिङर्थप्रकारकान्वयबोधने स्वरूपयोग्यः स तादृशार्थे प्रत्ययः। न च "चैत्रः अस्ति" इत्यत्र प्रथमान्तमुख्यविशेष्यकशाब्दबोधाङ्गीकारात् तत्रैव प्रथमान्ते सत्तायाः समवस्थानात् तस्य प्रथमान्तार्थस्य शब्दान्तराविशेषितया स्वार्थविशेष्यकतिङर्थकप्रकारकान्वयबोधने स्वरूपयोग्यत्वात् चैत्रस्याऽपि प्रत्ययत्वमतिव्याप्तम्भवति इति वाच्यम्। यतः पदार्थान्तरान्वच्छिन्ने स्वार्थे नाम्नि तिङर्थसङ्ख्यादीनां अन्वयबोधस्तु भवत्येव। अतः पदार्थावच्छिन्नतैव जाता। अत एव चैत्रत्वविशिष्टैकनामार्थत्वेन लाघवात् , तत्रैव कृतेरन्वयः समाम्नातः। अतोऽत्रापि पदान्तरार्थं धर्मितावच्छेदकीकृत्य यदर्थप्रकारकबोधो न भवति। किञ्च पदान्तरपदेन यस्य प्रत्ययत्वं चिकीर्षितं तद्भिन्नं पदं ग्राह्यम्। अन्यथा चैत्रोऽस्ति इत्यादौ तिङपेक्षया भेदस्य चैत्रपदेऽपि सत्वात् चैत्रत्वधर्मितावच्छेदकचैत्रविशेष्यकतिङर्थकृतिप्रकारकबोधस्य सत्वादतिव्याप्तिः दुर्वारैव। प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति नियमेन "यजेत् स्थीयते" इत्यादौ तिङाम्,पुत्रीयति इत्यादौ क्यजादीनाम्,पाचकोऽस्ति इत्यत्र कृताम् ,काश्यपी इत्यादौ तद्धितान्तानां प्रकृत्यर्थावच्छिन्ने एव स्वार्थे कृत्यादौ तिङर्थस्य वर्तमानत्वादेव बोधकत्वमभिमतं न तु तदवच्छिन्ने। अतः तत्र अतिव्याप्तिः न सम्भवति। किञ्च नुपूर्वकधाधातोः आतश्चोपसर्गे इति कप्रत्यये निपूर्वपदे काश इत्युत्तरपदे नि इत्यस्य

[२९] न्यायकोशः, पृष्ठसङ्ख्या-५४४

[३०] शब्दशक्तिप्रकाशिका कारिकासङ्ख्या-१०

इकः "**इकः काशे**"[३१] काशेः पूर्वपदस्य दीर्घः स्यादित्यर्थकेन दीर्घविधाने उपसर्गोपपदे कविधाने एतेषां शब्दानां समासमात्रप्रयोगार्हता स्पष्टा। अतः इतरान्वच्छिन्नतया तादृशस्वार्थे तिङर्थान्वयबोधम्प्रति स्वरूपयोग्यत्वात् प्रत्ययत्वमिति व्याप्तं तद्वारणाय निभाद्यन्यः इति विशेषणं लक्षणे समायोजितम्। एतत्सर्वं परकीयं मतम्। वस्तुशः तेषामेव नैयायिकादीनां सिद्धान्तः। तेषामेव प्रत्यलक्षणोपक्रमः।

अस्माभिस्तु तदीयाक्षरबाहुल्येनैव यथाभानं तदुपादाय अत्र सर्वं गुम्फितम्। अत्र किञ्चिद् ब्रूमः पूर्वत्र लक्षणे व्याकरणसिद्धान्तदृशा विराजितेऽपि दोषजाले स्वकीयान् पक्षान् अनुपस्थाप्य गौरवगर्भितदोषमेवाभिलक्ष्य सन्तुष्यन्तः प्रधानमल्लनिग्रहन्यायेन अत्रैव शब्दशक्तिप्रकाशिकाकृदभिप्रेतमतं परिशीलयामः इति तावत् पृच्छ्यते लक्षणमिदं समेषां कृते उताहो नैयायिकानाङ्कृते एव। यदि सर्वेषां कृते तर्हि अनुपपन्नं "**पश्य मृगो धावति**" इत्यत्र भाष्यसम्मतैकवाक्यतानुरोधेन व्यापारमुख्यविशेष्यकशाब्दबोधस्यैव न केवलमपितु नैयायिका अपि वैवश्यं भजन्तः अङ्गीकुर्वन्ति। अत एव सुधीतल्लजेन नैयायिकप्रकाण्डेन विद्याचणेन श्रीमता सुधिया **बच्चाझा**महाभागेन मुक्तकण्ठेन अङ्गीकृतम्। अतः प्रथमान्तमुख्यार्थविशेष्यानुरोधेन पृथग्लक्षणं भावनाविशेष्यकबोधानुरोधेन पृथग्लक्षणं करणीयमेव। "कोकिला कूजति शृणु" इत्यादिवाक्येषु कूजनार्थस्यैव आर्थिककर्मत्वेन भानं कस्य नाभिमतम्। अतः तिङर्थप्रकारकान्वयबोधने स्वरूपयोग्यः पदघटितलक्षणं न सम्भावि। निभनीकाशादीनां भिन्नत्वेन लक्षणसमावेशो पूर्वलक्षणवत् अत्रापि गौरवम्। यदि तु नैयायिकानां कृत एव लक्षणं तदा भवतां पार्षदकृतिरेषा। नास्माकं तथा किमपि प्रयोजनम्। तेन प्रत्ययाधिकारपठितत्वे सति प्रत्याययति स्वीयमर्थं स प्रत्ययः[३२] इत्येव लक्षणं राद्धान्तितम्। आश्चर्यमिदमृषिणा समाम्नातं प्रत्ययलक्षणविवेचनेषु नैसर्गिकप्राप्ताधिकारैः वैयाकरणैः बहुधा विमृष्टं लक्षणमविचार्य अपश्यन्त एव अहम्पुरुषिकया भावनया प्रत्ययलक्षणे छोदक्षेमं साधयन्ति एते इति।

तस्माच्च भाष्योक्तं लक्षणमेव वरमनुशासनात् आगमत्वाच्च अतः समेषां सम्यगवबोधनाय उपजीव्यभूतभाष्यनिबद्धशब्दराशिमिह सारांशतया आकलये। पाणिन्यष्टकस्य तृतीयाध्यायस्य प्रथमसूत्रस्य "**प्रत्ययः**"[३३] इत्यस्य व्याख्यानावसरे अधिकारेण इयं प्रत्ययसञ्ज्ञा क्रियते इति प्रतिज्ञावाक्यानन्तरं प्रकृत्युपपदोपाधीनाम्प्राप्नोति इत्याशङ्कितम्। यस्मात् प्रत्ययविधिः तत्प्रकृतिपदेन उच्यते। यथा गुप्तृज्--इत्यादयः उप समीपे पदम् उपपदं यथा "**हरदेर्दृतिनाथयोः**"[३४] इत्यत्र दृतिनाथयोः

---

[३१] अष्टाध्यायीसूत्रसङ्ख्या-६/३/१२३

[३२] प्रत्ययाधिकारविहितत्वं प्रत्ययत्वं वैशिष्ट्यञ्च प्रत्यायकत्वप्रत्यायिकत्वान्यतरसम्बन्धेन।

[३३] अष्टाध्यायीसूत्रसङ्ख्या-३/१/१

[३४] अष्टाध्यायीसूत्रसङ्ख्या-३/२/२५

उपपदत्वं स्पष्टम्। उपाधिर्नाम विशेषणं। तदेवोक्तं श्रीमता कैयटेन उपाधिशब्देन चेह तुल्यन्यायत्वात् विशेषणमप्युच्यते। क्वचित्तु तयोर्भेदेन व्यवहारः यथा **"नोपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणम्"**[३५]। पुनश्च श्लोकोऽपि उक्तः -

**"अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दो यः ।**

**अनुपाधिरतोन्यः स्याच्छलाघादि विशेषणं यद्वत् ॥**[३६]

यथा पशौ गम्यमाने ह्रुधातोः दृतिनाथयोरुपपदे प्रत्ययविधाने पशुरूपार्थः उपाधिः। सर्वेषां प्रत्ययाधिकारपठितत्वात् प्रत्ययसञ्ज्ञा प्राप्नोत्येव। अवश्यमेव करणीयः प्रत्ययाधिकारः यथा **"वृद्धिरादैच्"**[३७] इत्यादौ आदैचः निर्देशेन वृद्धिपदं आदैच्रूपार्थे शक्तं तथैव प्रत्ययपदेनाभिष्टं सर्वमपि शब्दराशिमकत्रकृत्य इमे प्रत्ययपदवन्तः इति सङ्केतेन दोषवारणेऽपि गौरवन्तु स्यादेव। न च गुप्तिज्किद्भ्यः सन् इत्यारभ्य **"उरः प्रभृतिभ्यः कप्"**[३८] इति यावत् शप्रत्यहारमङ्गीकृत्य तत्र प्रत्ययपदस्य सङ्केतः अवधार्यताम्। परन्तु मध्ये अनेकेषां प्रत्ययघटकान्तपकारान्तानां विद्यमानत्वं सन्देहस्य दुर्धरत्वेन समाधानस्यास्य अयुक्तत्वात् स्पष्टमेव। एतत्सर्वं विमृश्य प्रत्ययसञ्ज्ञायाः फलमपि उपात्तम्। पुनश्च निमित्तस्य निमित्तिकार्यार्थत्वात् तेनैव वार्तिकेन समाहितमपि। अन्ते "प्रत्ययः" इति प्रथमान्तस्य समानाधिकरण्यानुरोधात् प्रायशः प्रकृतेः पञ्चम्यन्तता अनन्तरार्थाभिधाने षष्ठ्यन्तत्वेऽपि अर्थतः पञ्चम्यन्तता उपाधेरपि प्रायशः सप्तम्यन्तत्वम्,उपपदस्यापि सप्तम्यन्तत्वं स्पष्टमेव। तेन प्रत्ययः इत्यनेन प्रथमान्तेन समानाधिकरण्यमर्हन् कश्चित् प्रथमान्तस्यैव प्रत्ययान्तत्वं सम्भवति। तत्र भवन्ति आदेशाः आगमाः विकाराः परन्तु तेषां प्रत्यायकत्वं नास्ति यतः प्रत्ययत्वसम्बन्धेन क्वचिदपि स्पष्टसङ्केतग्रहः नोपलभ्यते। केचन आगमास्तु प्रत्ययत्वेन अभिमताः। अतस्तेषामर्थविशेषनिर्देशाभावेऽपि अर्थप्रत्यायकत्वं कल्प्यत एव। आदेशास्तु न तथा स्थान्यर्थाभिधानसमर्थस्यैवादेशताङ्गीकारात्। स्वार्थिकप्रत्ययानामपि स्वकीयोऽर्थः भवत्येव। न च **"अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति"** इति नियमात् तेषां कश्चित् स्वकीयः अर्थः नास्ति इति वक्तव्यं तस्य वाक्यस्य कल्पनामात्रत्वेन दोषाभावात्। उक्तञ्च श्रीमता कैयटेन- **"अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति प्रकृत्यर्थ एव तेषामर्थ इति, तदपि कल्पनामात्रम्। सत्यर्थवत्त्वे प्रत्ययसञ्ज्ञया भाव्यमिति अभिहिते तदभावे स्वार्थावगमादर्थवत्त्वं कादीनां नोपपद्यते इत्युक्तस्य दुरुत्तरत्वात्"**[३९]।

---

[३५] प्रत्ययसूत्रस्य प्रदीपे,पृष्ठसङ्ख्या-१

[३६] तत्रैव

[३७] अष्टाध्यायीसूत्रसङ्ख्या-१/१/१

[३८] अष्टाध्यायीसूत्रसङ्ख्या-५/४/१५१

[३९] प्रत्ययसूत्रस्थप्रदीपः,पृष्ठसङ्ख्या-७

अतः अर्थावधारणाय अन्वयव्यतिरेकस्य साहाय्यं समेषां स्पष्टम्। मन्येऽहं यत् स्वार्थिकप्रत्यया अपि प्रायशः तद्धितान्तप्रत्ययाः भवन्ति तद्विशिष्टे अर्थवत्त्वाभावात् प्रातिपदिकसञ्ज्ञैव न सम्भवति। अतः पदापोद्धारकल्पनायाः अनित्यत्वात् तद्घटकसर्वस्यापि शब्दराशेः अभिव्यक्ततरार्थाभिव्यक्तौ कारणत्वन्तु अस्त्येव। अत एव तेषामपि अर्थवत्वं कल्पनीयमेव भवति। कल्पनायाः सर्वत्र सम्भवत्वात्।

अत एव स्वीयमर्थं प्रत्याययन्ति इत्युक्तम्। अथवा कर्मव्युत्पत्त्या स्वार्थिकानामपि सङ्ग्रहः कर्त्तव्यः इति भाष्ये स्पष्टम्। तेन प्रत्ययाधिकारपठितत्वे सति यः स्वमर्थं बोधयति सः प्रत्ययः। स्वमर्थमित्यत्र अनेकशक्तियोगात् प्रवृत्तनिमित्तद्वयावच्छिन्नः अर्थः ग्राह्यः। एकः कर्तृव्युत्पत्तिपरः अपरः कर्मव्युत्पत्तिपरः। तेन सर्वमपि समाहितम्। महती सञ्ज्ञापि सङ्गता इत्येव भाष्यस्य सारांशः। तत्र **"अर्थाश्रयत्वाद्वा"**[४०] वार्तिकव्याख्यानप्रसङ्गे भाष्यकृता प्रत्ययस्य महतीं सञ्ज्ञां विधाय अस्यान्वर्थतापि उद्घोषिता। तथा च तत्रत्यमविकलम्भाष्यमिह प्रमाणत्वेनोपस्थाप्यते-

**"अथवा अर्थाश्रयः प्रत्ययविधिः यस्तमर्थं सम्प्रत्याययति स प्रत्ययः। किं वक्तव्यमेतत् ? न हि । कथमनुच्यमानं गंस्यते ? प्रत्यय इति महती सञ्ज्ञा । सञ्ज्ञा च नाम यतो न लघीयः। कुत एतत् ? लघ्वर्थं हि सञ्ज्ञाकरणम्। तत्र महत्याः सञ्ज्ञायाः करण एतत्प्रयोजनम् अन्वर्थसञ्ज्ञा यथा विज्ञायेत। प्रत्याययतीति प्रत्ययः। यदि प्रत्याययतीति प्रत्ययोऽविकादीनां प्रत्ययसञ्ज्ञा न प्राप्नोति। न हि ते किञ्चित् प्रत्याययन्ति एवं तर्हि प्रत्याय्यते इति प्रत्यय। ( यदि प्रत्याय्यते इति प्रत्यय इति) एवमपि सन्नादीनां न प्राप्नोति। एवं तर्ह्युभयसाधनोऽयं कर्तृसाधनश्च एवमपि कुत एतत्समाने अपूर्वोपदेशे त्रापुषं जातुषमित्याकारः तमर्थं सम्प्रत्याययति न पुनः षकारः इति -------क्वान्यत्र ? बिल्वादिभ्योऽण् बैल्वः"**[४१] भट्टनागेशेन तु अत्र एव स्वकीयं तात्पर्यमवधारितम्। परन्तु तेषां लघुशब्देन्दुशेखराख्ये ग्रन्थे स्वीयमर्थं प्रत्यायन्ति इति विग्रहयुक्तं वाक्यं प्रदर्शितम्। भाष्ये स्वमर्थमिति। अभिप्राये नास्ति भेदः तथापि वाक्यस्वरूपेऽस्ति भेदः यद्वा प्राचीनमुद्रणेषु तादृश एव पाठः उपलब्धः स्यात् तेन भाष्यसम्मतलक्षणाङ्गीकारे नास्ति कश्चित् क्लेशः।

एवम्प्रकारेण भाष्यकृतां हार्दमभिलक्ष्य प्रत्ययत्वम्परिभाषितम्। तेन प्रकृतेरपि परिभाषणं स्वतः सिद्धम्भवति। अतः यस्य प्रत्ययत्वं चिकीर्षितं तन्निष्ठविधेयतानिरुपितोद्देश्यताश्रयत्वं प्रकृतित्वं तच्च द्विविधं निवृत्यसमानाधिकरण्यरूपम्,अवयवत्वाधिकरण्यरूपञ्च। यत्र श्नमादीनां विधानं तत्रावयवत्वा-धिकरणरूपम्। यत्र तु परत्वेन विधानं तत्र निवृत्यसमानाधिकरण्यम्। स्थान्यादेशेषु तु निवृत्तिसमानाधिकरण्यं स्पष्टमेवावलोक्यते। अत एव प्रसङ्गशब्दस्य सार्थक्यम्भवति। अथवा

---

[४०] व्याकरणमहाभाष्यम्-०३/०१/०१ इतिसूत्रस्थं वार्तिकम्

[४१] व्याकरणमहाभाष्यम्-०३/०१/०१

साक्षात्परम्परया वा धातुपाठकोशादौ निर्दिष्टार्थस्य अभिधया बोधकत्वं यस्य अस्ति तस्य प्रकृतित्वं वक्तुं शक्यते। अत एव भट्टनागेशेन प्रकृत्यर्थत्वञ्च "धातुपाठकोशादौ तमुचार्यबोधितत्वमित्यादिनिर्देशः पूर्वमेव कृतः। इदन्तु अवधेयं न केवला प्रकृतिः प्रयोक्तव्व्या न वा प्रत्ययः इत्येष न्यायः शास्त्राबोधितप्रकृतिप्रत्ययविषये अवश्यमेवाभ्युपेयः। लिट् ,इत्यान् इत्यादौ केवलप्रकृतिप्रत्ययप्रयोगेऽपि तयोः शास्त्रबोधितत्वात् तद्विषयत्वं न जायते। अतः प्रत्ययान्तस्यैव प्रयोगः कर्तव्यः पुनश्चावधेयम् यदत्र प्रत्ययपदेन सुबन्तं तिङन्तं वा गृह्यते तद्भिन्नप्रत्ययान्तानां केवले प्रयोगस्य विधानं नास्ति अभिव्यक्ततरार्थस्य उपस्थाने सामर्थ्याभावात्। सर्वस्याप्यनुभवः स्पष्टं मानं तथापि उपजीव्यत्वेन अनुभवस्यापि आनुभाविकत्वेन प्रमाणतल्लजः आचार्यः श्रीभर्तृहरिः अत्रोपस्थाप्यते। -

**"धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते। कृत्तद्धितानामर्थश्च केवलानामलौकिकः।।**
**प्राग्विभक्तेः तदन्तस्य तथैवार्थो न विद्यते"। इत्यादि**

अत्र कैयटोऽपि उक्तवान् यत्र कृत्तद्धितप्रत्ययान्तेषु लौकिकार्थप्रत्यासन्नो अभिव्यक्ततरः योऽर्थः, स एव लक्ष्यते स आश्रीयते इति अस्य भट्टनागेशेन एवं विवरणमुपस्थापितम्। " लौकिकं यद्पदं यदर्थस्य प्रत्यासन्नः शास्त्रकृत्कल्पितः स्वादिप्रकृतेरर्थः प्रत्यान्तेषु सुबन्तेषु योऽभिव्यक्तपरः लक्ष्यते बोद्धृभिः स" इत्यादि। अपरमपि "**अपदं न प्रयुञ्जीत**" [४२] इत्यादिभाष्यमपि अत्रैवार्थे सम्बलमवधारयति। **अपदमि** [४३] त्यस्य परिनिष्ठमित्यादिव्याख्यानमपि अत्रैव तात्पर्यग्राहकम्। एतत्सर्वस्य निरूपणे ममायमभिप्रायः सुबन्ततिङन्तयोः मुख्यतया वाक्यघटकत्वेन प्रविष्टत्वेऽपि तद्घटकानां प्रकृतित्वसम्पादकानां प्रत्ययानां विवेचनमवश्यमेव कर्तव्यमन्यथा शब्दपारायणप्रसङ्ग अवश्यमेव प्राप्तो भविष्यति ,तस्य च अनभ्युपायता भाष्यकृता प्रतिपादितैव। प्रत्ययस्य अतिप्राचीनसञ्ज्ञात्वमपि [४४] प्रसिद्धमेव।

डॉ. रामसलाहीद्विवेदी
सहायकाचार्यः व्याकरणविभागे,
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्,
कटवारियासरायः, नवदेहली—११००१६

[४२] महाभाष्यम्,अनिभिहिते २.३.१

[४३] पदत्वन्नाम परिनिष्ठितत्त्वम् तच्च अप्रवृत्तनिमित्तविध्युद्देश्यतावच्छेदकानाक्रान्तत्वम्,परश्चेति सूत्रे शेखरे,पृष्ठसङ्ख्या-१७२।

[४४] प्रत्यय इति प्राचीनानां सञ्ज्ञा अस्ति ।अस्यातिप्राचीनत्वमुक्तं गोपथब्राह्मणे- "ओङ्कारं पृच्छामि को धातुः किं प्रातिपदिकम्,किं नामाख्यातम्,किं लिङ्गं किं वचनं का विभक्तिः कः प्रत्ययः,कः स्वरः उपसर्गो निपातः,किं वै व्याकरणम्, को विकारः,को विकारी, कति मात्रः,कति वर्णः,कत्यक्षरः,कति पदः,कः संयोगः किं स्थाननादानुप्रदानानुकरणमित्यादि---(गोपथब्राह्मण.पू०-१/२४)